॥ वाल्मीकि रामायण॥

६ युद्धकाण्ड

अध्याय ८४

तथा तैः कृत्तगात्रैस्तु दशग्रीवेण मार्गणैः ।
बभूव वसुधा तत्र प्रकीर्णा हरिभिर्वृता ॥ १॥

रावणस्याप्रसह्यं तं शरसम्पातमेकतः ।
न शेकुः सहितुं दीप्तं पतङ्गा इव पावकम् ॥ २॥

तेऽर्दिता निशितैर्बाणैः क्रोशन्तो विप्रदुद्रुवुः ।
पावकार्चिःसमाविष्टा दह्यमाना यथा गजाः ॥ ३॥

प्लवङ्गानामनीकानि महाभ्राणीव मारुतः ।
स ययौ समरे तस्मिन्विधमन्रावणः शरैः ॥ ४॥

कदनं तरसा कृत्वा राक्षसेन्द्रो वनौकसाम् ।
आससाद ततो युद्धे राघवं त्वरितस्तदा ॥ ५॥

सुग्रीवस्तान्कपीन्दृष्ट्वा भग्नान्विद्रवतो रणे ।
गुल्मे सुषेणं निक्षिप्य चक्रे युद्धे द्रुतं मनः ॥ ६॥

आत्मनः सदृशं वीरं स तं निक्षिप्य वानरम् ।
सुग्रीवोऽभिमुखः शत्रुं प्रतस्थे पादपायुधः ॥ ७॥

पार्श्वतः पृष्ठतश्चास्य सर्वे यूथाधिपाः स्वयम् ।
अनुजह्रुर्महाशैलान्विविधांश्च महाद्रुमान् ॥ ८॥

स नदन्युधि सुग्रीवः स्वरेण महता महान् ।
पातयन्विविधांश्चान्याञ्जघानोत्तमराक्षसान् ॥ ९॥

ममर्द च महाकायो राक्षसान्वानरेश्वरः ।
युगान्तसमये वायुः प्रवृद्धानगमानिव ॥ १०॥

राक्षसानामनीकेषु शैलवर्षं ववर्ष ह ।
अम्बुवर्षं यथा मेघः पक्षिसङ्घेषु कानने ॥ ११॥

कपिराजविमुक्तैस्तैः शैलवर्षैस्तु राक्षसाः ।
विकीर्णशिरसः पेतुर्निकृत्ता इव पर्वताः ॥ १२॥

अथ सङ्क्षीयमाणेषु राक्षसेषु समन्ततः ।
सुग्रीवेण प्रभग्नेषु पतत्सु विनदत्सु च ॥ १३॥

विरूपाक्षः स्वकं नाम धन्वी विश्राव्य राक्षसः ।
रथादास्फुत्य दुर्धर्षो गजस्कन्धमुपारुहत् ॥ १४॥

स तं द्विरदमारुह्य विरूपाक्षो महारथः ।
विनदन्भीमनिर्ह्रादं वानरानभ्यधावत ॥ १५॥

सुग्रीवे स शरान्घोरान्विससर्ज चमूमुखे ।
स्थापयामासा चोद्विग्नान्राक्षसान्सम्प्रहर्षयन् ॥ १६॥

सोऽतिविद्धः शितैर्बाणैः कपीन्द्रस्तेन रक्षसा ।
चुक्रोध च महाक्रोधो वधे चास्य मनो दधे ॥ १७॥

ततः पादपमुद्धृत्य शूरः सम्प्रधने हरिः ।
अभिपत्य जघानास्य प्रमुखे तं महागजम् ॥ १८॥

स तु प्रहाराभिहतः सुग्रीवेण महागजः ।
अपासर्पद्धनुर्मात्रं निषसाद ननाद च ॥ १९॥

गजात्तु मथितात्तूर्णमपक्रम्य स वीर्यवान् ।
राक्षसोऽभिमुखः शत्रुं प्रत्युद्गम्य ततः कपिम् ॥ २०॥

आर्षभं चर्मखड्गं च प्रगृह्य लघुविक्रमः ।
भर्त्सयन्निव सुग्रीवमाससाद व्यवस्थितम् ॥ २१॥

स हि तस्याभिसङ्क्रुद्धः प्रगृह्य महतीं शिलाम् ।
विरूपाक्षाय चिक्षेप सुग्रीवो जलदोपमाम् ॥ २२॥

स तां शिलामापतन्तीं दृष्ट्वा राक्षसपुङ्गवः ।
अपक्रम्य सुविक्रान्तः खड्गेन प्राहरत्तदा ॥ २३॥

तेन खड्गेन सङ्क्रुद्धः सुग्रीवस्य चमूमुखे ।
कवचं पातयामास स खड्गाभिहतोऽपतत् ॥ २४॥

स समुत्थाय पतितः कपिस्तस्य व्यसर्जयत् ।
तलप्रहारमशनेः समानं भीमनिस्वनम् ॥ २५॥

तलप्रहारं तद्रक्षः सुग्रीवेण समुद्यतम् ।

नैपुण्यान्मोचयित्वैनं मुष्टिनोरस्यताडयत् ॥ २६ ॥

ततस्तु सङ्क्रुद्धतरः सुग्रीवो वानरेश्वरः ।
मोक्षितं चात्मनो दृष्ट्वा प्रहारं तेन रक्षसा ॥ २७ ॥

स ददर्शान्तरं तस्य विरूपाक्षस्य वानरः ।
ततो न्यपातयत्क्रोधाच्छङ्खदेशे महातलम् ॥ २८ ॥

महेन्द्राशनिकल्पेन तलेनाभिहतः क्षितौ ।
पपात रुधिरक्लिन्नः शोणितं स समुद्वमन् ॥ २९ ॥

विवृत्तनयनं क्रोधात्सफेन रुधिरास्रुतम् ।
ददृशुस्ते विरूपाक्षं विरूपाक्षतरं कृतम् ॥ ३० ॥

स्फुरन्तं परिवर्जन्तं पार्श्वेन रुधिरोक्षितम् ।
करुणं च विनर्दान्तं ददृशुः कपयो रिपुम् ॥ ३१ ॥

तथा तु तौ संयति सम्प्रयुक्तौ
तरस्विनौ वानरराक्षसानाम् ।
बलार्णवौ सस्वनतुः सभीमं
महार्णवौ द्वाविव भिन्नवेलौ ॥ ३२ ॥

विनाशितं प्रेक्ष्य विरूपनेत्रं
महाबलं तं हरिपार्थिवेन ।
बलं समस्तं कपिराक्षसानाम्
उन्मत्तगङ्गाप्रतिमं बभूव ॥ ३३ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com